संस्कृतभारती
जयतु संस्कृतं विश्वपोषकम्।

एवञ्च

श्रीजयरामब्रह्मचर्याश्रमः

नवदेहली

द्वारा

समायोज्यमाना

# अखिलभारतीया शलाकापरीक्षा (2026-27)

परीक्षादिनाङ्कः - फाल्गुनशुक्लषष्ठी, युगाब्दः 5128 ( 14.03.2027 ), रविवासरः

| विषयः | | ग्रन्थः, निर्धारितग्रन्थांशः |
|---|---|---|
| व्याकरणम् | - | वैयाकरणसिद्धान्तकौमुदी ( संज्ञा, परिभाषा, पञ्च सन्धयः, स्त्रीप्रत्ययः, कारकप्रकरणम्, समासप्रकरणं च ) |
| न्यायः | - | न्यायसिद्धान्तमुक्तावली ( आदितः अनुमानखण्डं यावत् ) |
| वेदान्तः | - | वेदान्तपरिभाषा ( आदितः अनुमानखण्डं यावत् ) |
| सांख्यदर्शनम् | - | सांख्यतत्त्वकौमुदीसहिता सांख्यकारिका ( आदितः 18 कारिकां यावत् ) |
| साहित्यम् | - | काव्यप्रकाशः ( आदितः चतुर्थोल्लासं यावत् ) |
| ज्योतिषम् | - | सूर्यसिद्धान्तः ( आदितः त्रिप्रश्नाधिकारान्तो भागः ) |
| मीमांसा | - | अर्थसङ्ग्रहः ( सम्पूर्णः ) |
| लघुसिद्धान्तकौमुदी | - | ( सम्पूर्णा ) |
| अमरकोषः | - | प्रथमकाण्डः<br>( अमरकोषस्पर्धायां वर्गद्वयम् )<br>प्रथमवर्गः - आरम्भतः सप्तमीं कक्षां तत्तुल्यपारम्परिककक्षां वा यावत् पठतां छात्राणां कृते।<br>द्वितीयवर्गः - अष्टमीकक्षातः द्वादशीं कक्षां तत्तुल्यपारम्परिककक्षां ( प्रथमातः मध्यमां/प्राक्शास्त्रीं/उत्तरमध्यमां ) वा यावत् पठतां छात्राणां कृते। |

## पुरस्कारविवरणम्

| प्रथमपुरस्कारः | द्वितीयपुरस्कारः | तृतीयपुरस्कारः |
|---|---|---|
| 20,000/- | 15,000/- | 10,000/- |

## सम्पर्कसूत्रम्

प्रो. गोपबन्धुमिश्रः, प्रो. कृष्णकान्तशर्मा, प्रो. श्रीनिवासवरखेडी, प्रो. शिवशङ्करमिश्रः

Email id: shalakapariksha@gmail.com, Mob.: 9935426008, 9411171081, 7752847621

पञ्जीकरणम् - अन्तर्जाल (https://www.samskritabharati.in/shalakapariksha) माध्यमेनैव करणीयम्।

# शलाकापरीक्षायाः नियमावली

- लघुसिद्धान्तकौमुदी-ग्रन्थः केवलं मध्यमां / द्वादशीं कक्षां वा यावत् पठतां छात्राणां कृते विद्यते।
- परीक्षार्थी निर्धारितविषयेषु कस्मिंश्चिद् एकस्मिन् एव विषये भागं ग्रहीतुं शक्नोति।
- ये प्रतिभागिनः 2026-तमं वर्षं यावत् यस्मिन् विषये प्रथमं स्थानं प्राप्तवन्तः, ते प्रतिभागिनः तद्विषयं विहाय अन्यस्मिन् विषये भागग्रहणं कर्तुं शक्नुवन्ति।
- अमरकोषं लघुसिद्धान्तकौमुदीं च विहाय अन्येषु विषयेषु शास्त्री-आचार्यकक्षयोः, बी.ए,एम.ए. तत्समकक्षयोः वा पठन्तः छात्राः एव भागं ग्रहीतुं शक्नुवन्ति। स्नातकोत्तर-परीक्षोत्तीर्णः छात्रः परीक्षार्थं नार्हः।
- परीक्षा त्रिषु चक्रेषु भविष्यति। प्रथमचक्रे स्मृतिपरीक्षा (ग्रन्थः कण्ठस्थः अस्ति न वेति परीक्षा) भविष्यति, तत्र उत्तीर्णः प्रतिभागी द्वितीयचक्रं प्रविशति। द्वितीयचक्रे शास्त्रपरीक्षा (शास्त्रस्य अर्थज्ञानम् अस्ति न वेति परीक्षा) भविष्यति। द्वितीयचक्रे उत्तीर्णः प्रतिभागी तृतीयचक्रे प्रवेष्टुम् अर्हति। तृतीयचक्रे विशिष्टपरीक्षा (शास्त्रस्य तात्पर्यादिज्ञानम् अस्ति न वेति परीक्षा) भविष्यति ।
- अमरकोषस्य परीक्षा चक्रद्वये भविष्यति। प्रथमचक्रे स्मृतिपरीक्षा, तत्र उत्तीर्णः प्रतिभागी द्वितीयचक्रं प्रविशति, द्वितीयचक्रे अर्थज्ञानपर्यायादिज्ञानपरीक्षा।
- प्रतिभागिनः स्वविद्यालयात्/विभागात् परिचयपत्रं संस्तुतिपत्रं च अपेक्ष्यते।
- यदि प्रतिभागी संस्थायाम् अध्ययनरतो नास्ति, गुरोः सविधे पठन् अस्ति तर्हि तेन स्वगुरोः सकाशाद् एकं प्रमाणपत्रं ग्राह्यं यत्र स्पष्टतया उल्लेखः स्यात् यत् सः कति वर्षाणि यावत् तस्मिन् विषये गुरोः सकाशे अध्ययनरतः अस्ति इति।
- समागतेभ्यः सर्वेभ्यः प्रतिभागिभ्यः प्रोत्साहनराशिः दीयते।

**परीक्षास्थलम्** श्रीजयराम-ब्रह्मचर्याश्रमः, हरिनगरम्, मथुरामार्गः, नवदेहली-110024

**परीक्षादिनाङ्कः** फाल्गुनशुक्लषष्ठी, युगाब्दः 5128 (14/03/2027), रविवासरः।

- परीक्षास्थले परीक्षायाः पूर्वदिवसादारभ्य अनन्तरदिवसं यावद् आवास-भोजनव्यवस्था भविष्यति।
- दूराद् आगतैः प्रतिभागिभिः परीक्षायाः अपरस्मिन् (15/03/2027) दिवसे प्रस्थातव्यम्, न तु परीक्षादिवसे।

**पञ्जीकरणम्** अन्तर्जाल-(https://samskritabharati.in/shalakapariksha) माध्यमेनैव करणीयम्।

- पञ्जीकरणस्य अन्तिमा तिथिः 14/02/2027 अस्ति, अतः पञ्जीकरणम् अद्यारभ्य 14/02/2027 दिनाङ्कं यावद् भविष्यति।
- उत्तीर्णाः सप्रमाणपत्रं पुरस्करिष्यन्ते।
- निर्णायकानां निर्णयः अन्तिमो भविष्यति।